Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 2 | ISSN : 2581- 6306

# वाक्यपदीये अपादानविमर्शः



सोनमती पटेल
असिस्टेंट प्रोफेसर, संस्कृत-विभाग,
आर्यकन्या डिग्री कालेज, प्रयागराज,
उत्तर प्रदेश, भारत.

**सारांशः -** शोधपत्रस्य विषयः वर्तते "वाक्यपदीये अपादानविमर्शः" । अधिकारेऽस्मिन् अपादानस्य विवेचनं सम्प्राप्तः। भर्तृहरिः विभक्त्यनुक्रमेण सम्प्रदानं विविच्य विश्लेष्य वा अपादनं आरभते इति तट्टीकाकारौ व्यङ्क्तः। "ध्रुवमपायेऽपादानम्" इत्यत्र पाणिनिसूत्रे ध्रुवम्, अपाये च इति द्वयं संज्ञिदलम्, अपादानम् च संज्ञादलम्। कारकसंज्ञासूत्रेषु ध्रुवत्वात् प्रथमं अपादानम् संज्ञासूत्रम् सम्प्राप्तम्। अनन्तरं अध्रुवत्त्वात् तदेतरसंज्ञासूत्राणि। तत्र न अपादानस्य अवकाशः। वार्तिकेनापि प्रमाणितम्' अपादानमुत्तराणि कारकाणि बाधन्ते'। अपायो विश्लेषार्थे विभागार्थे वा प्रयुज्यते। भर्तृहरिः त्रिविधं अपादानं अङ्गीकृतम्।

**कूटशब्दाः** – साधनम (कारकम्), अपायः, ध्रुवम्, अध्रुवम्, चलाचलौ, संरब्ध-उदासीनौ, गतिः, निर्दिष्टविषयं, उपात्तविषयं, अपेक्षितक्रियश्च।

सर्ववेदपारिषदं हीदं व्याकरशास्त्रमिति महाभाष्यकृद्भिः भाष्ये प्रोक्तम्। व्याकरणशास्त्रस्य दार्शनिकनिदर्शनं कारिकामयवाक्यपदीये विशदीक्रियते भर्तृहरिणा। त्रिकाण्डात्मके वाक्यपदीये तृतीये पदकाण्डे चतुर्दशसमुद्देशाः वर्तन्ते। तत्र क्रमशः जातिसमुद्देशः, द्रव्यसमुद्देशः, सम्बन्धसमुद्देशः, भूयोद्रव्यसमुद्देशः, गुणसमुद्देशः, दिक्समुद्देशः, साधनसमुद्देशः,क्रियासमुद्देशः, कालसमुद्देशः, पुरुषसमुद्देशः, संख्यासमुद्देशः, उपग्रहसमुद्देशः,लिङ्गसमुद्देशः, वृत्तिसमुद्देशश्चेति विकीर्णा बहवः समुद्देशाः विलसन्ति। तत्र क्रमप्राप्ते सप्तमे साधनसमुद्देशे कर्म-कर्तृ-करण-हेतु-सम्प्रदानापादानाधिकरण-शेषाणामाधिकारा निरूपिताः सन्ति।

समुद्देशस्तु सम्यक्तया वस्तुस्थितेः बोधविषयस्य वा कथनम् एव समुद्देशः वर्तते। न्यायमार्गे तु 'नाममात्रेण वस्तुसंकीर्तनमुद्देशः' इति संकीर्तितम्[1]। अतः अत्र शब्दानुशासनस्य गूढविषयाणां ऋजुतया

[1] तर्कसंग्रहः, …..

प्रत्याख्यानमेव उद्देशः इति उचितम्। भर्तृहरिणा चतुर्दशसमुद्देशेषु निहिताः चत्वारः पदार्थाः –दिक्-साधन-क्रिया-कालाः इति शक्तिसमूहे ग्रथिताः। दिक् एका शक्तिः वर्तते, एवमेव साधनमपि शक्तिः इत्यत्र न कोऽपि संशयः।

साधनं[2] नाम कारकं इति पाणिनिना विरचितं 'कारके'[3] इति सूत्रस्य भाष्यव्याख्याने सिद्धम्। पतञ्जलिभर्तृहरिमते साधनशब्दः कारकार्थे प्रयुक्तः, यतोहि क्रियानिष्पत्तौ कर्ताप्रभृतयः साधनानि एव भवन्ति। तात्पर्यं वर्तते यत् क्रियानिष्पत्तेः सामर्थ्यं शक्तिः वा यस्मिन् वर्तते तदेव साधनं। पतञ्जलिः 'सप्तमीपञ्चमौ कारकमध्ये' इति सूत्रस्य व्याख्याने साधनं शक्तिपरम् अनुगृह्णाति[4]। बनमाली विस्वालः ब्रवीति[5] – कारकशब्दः तम् सामर्थ्यं अथवा ताम् क्षमतां दर्शयति यस्मिन् यस्यां वा किमपिवस्तु क्रियासमुत्पादने प्रधानभूमिकां प्रतिपादयति। सा कदाचित् भावनारूपेण अनुभूयते। यद्यपि सा शक्तिः प्रधानतया एकैव– कर्तृत्वशक्तिः वर्तते। परञ्च सैव अवान्तरव्यापारविवक्षया कर्तृ-कर्मादिषड्-रूपेषु विभज्यते[6]। एवमेव व्याकरणपरंपरायां षट्कारकाणि स्वीक्रियन्ते।

भर्तृहरिरपि इमामेव परंपरां अनुसरति। तत्र कर्तृ-कर्मन्-करण-सम्प्रदान-अपादान-अधिकरणानि नाम [7]। एतानि कारकाणि प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-सम्बोधनेभ्यः ज्ञायन्ते। तेषां विभक्तीनामर्थोऽपि वाच्यः[8]।

भर्तृहरिः 'सामर्थ्यं साधनम्'[9] इति विविच्य स्वौजसमौट्... सूत्रस्थविभक्तिविधानक्रमेण कारकं समारभते। अष्टाध्याय्यां स्वादिविधिविधानं येन क्रमेण उपस्थाप्यते, तेनैवक्रमेण इह वाक्यपदीये कारकाणि विविच्यन्ते।

वाक्यपदीयस्य साधनसमुद्देशे 'स्वौजसमौट्' [10] इति सूत्रनिर्दिष्टविभक्त्यनुक्रमानुसारेण कर्मादिकारकनिर्देशः प्रतिपादितः। परञ्च अष्टाध्याय्यां 'विप्रतिषेधे परं कार्यम्'[11] इति नियमसूत्रेण

---

[2] साधन-नपुं०, सिध्-णिच् साधनादेशे यथायथं करणे भावे ल्युट् कर्तरि ल्यु वा ।वाचस्पत्यम्, भाग-६, पृ०-५२७८

[3] कारक इति महती संज्ञा क्रियते। तत्र महत्याः संज्ञाकरणे एतत्प्रयोजनम्-अन्वर्थसंज्ञा। करोतीति कारकमिति। म.भा. १-४-२३

[4] नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं चेत् कारकमध्यमपि भवति। तत्र कारकमध्ये इत्येव सिद्धम्। (तद्गता शक्तिरुच्यते इत्याह शक्तिरिति)। म०भा०प्र०उ०, २-३-७

[5]The term Kāraka briefly denotes the capacity in which a thing becomes instrumental in bringing about an action. This capacity is looked upon as the sence of the case affixes which express it. There are six kārakas accepted by most of the grammarians including Bhartṛhari, namely कर्तृ-कर्मन्-करण-सम्प्रदान-अपादान-अधिकरण. To express them, the respective case affixes like- प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी and सप्तमी are used. `Bhartṛhari as a Grammarian & philosopher', Banamali Bisval, P.102

[6] निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते। षोढा कर्तृत्वमेवाहुस्तत् प्रवृत्तेर्निबन्धनम्॥ वाक्यपदीयं, तृतीयं काण्डं, साधनसमुद्देशः-३७

[7] कर्ता, कर्म च करणं सम्प्रदानम् तथैव च। अपादानाधिकरणं इत्याहुः कारकाणि षट्। परमलघुमञ्जूषा, कारकार्थनिरूपणम्।

[8] आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा। यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥ वैयाकरणभूषणसारे, सुबर्थनिर्णयः-२४

[9] स्वाश्रये समवेतानां तदवदेवाश्रयान्तरे क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥ साधनसमुद्देशः, कारिका -१

[10] पा०अ०, ४-१-२

[11] पा०अ०, १-४-२

अनुरुध्य अपादानादिक्रमेण पाणिनिः उक्तः। भाष्येऽपि उक्तं 'अपादानसंज्ञामुत्तराणि कारकाणि बाधन्ते'[12] यथा- 'धनुषा विध्यति', 'कंसपात्र्यां भुङ्क्तेत्यादयः'। 'धनुषा विध्यत' इति अपाययुक्तत्वात् 'ध्रुवमपायेऽपादानम्' इति अपादानसंज्ञा प्राप्नोति, 'साधकतमं करणम्' इति च करणसंज्ञा। सा परा भवति[13]। तत्र विभक्तयः स्वौजसमित्यादयः वर्तन्ते। कारकमभिहितमनभिहितं च भवति। तत्र अभिहितकारकविभक्तिः प्रथमा। सा प्रतिपादकार्थमात्रे एव विधीयते। द्वितीयादयश्च सर्वाः विभक्तयः अनभिहिते कारके भवन्ति। अतो हेतो विप्रतिषेधसूत्रानुसारेण पाणिनिग्रन्थे विहितस्यापादानादिकारकविशेषनिर्देशस्यानेकप्रक्रमत्वात् 'स्वौजसमौट्' इति द्वितीयादिनिर्देशस्य च एकप्रक्रमत्वात् द्वितीयाद्यर्थानुसारेणेव इह कारकक्रमं आरभते।

विषयेऽस्मिन् दार्शनिकानां मध्ये बहवः विप्रतिपत्तयः अनुभूयन्ते। एतेषां विप्रतिपत्तीनां मूलं वाक्यपदीयम्। अतो हेतो वाक्यपदीयं अन्वेषणीयम्।

शोधपत्रस्य विषयः वर्तते "वाक्यपदीये अपादानविमर्शः" । अधिकारेऽस्मिन् अपादानस्य विवेचनं सम्प्राप्तः। भर्तृहरिः विभक्त्यनुक्रमेण सम्प्रदानं विविच्य विश्लेष्य वा अपादनं आरभते इति तट्टीकाकारौ व्यङ्क्तः।[14] ''ध्रुवमपायेऽपादानम्''[15] इत्यत्र पाणिनिसूत्रे ध्रुवम्, अपाये च इति द्वयं संज्ञिदलम्, अपादानम् च संज्ञादलम्। कारकसंज्ञासूत्रेषु ध्रुवत्वात् प्रथमं अपादानम् संज्ञासूत्रम् सम्प्राप्तम्। अनन्तरं अध्रुवत्त्वात् तदेतरसंज्ञासूत्राणि। तत्र न अपादानस्य अवकाशः। वार्तिकेनापि प्रमाणितम्' अपादानमुत्तराणि कारकाणि बाधन्ते'[16]।

"ध्रुवमपायेऽपादानम्"[17] इति अपादानसंज्ञकसूत्रे यत् विश्लेषजनकक्रियायां यदवधिभूतं अर्थं तस्यापादानसंज्ञा वर्तते। अर्थात् विश्लेषे यः ध्रुवत्वेन निश्चलत्वेन विवक्षितः, तस्य अपादानसंज्ञा भवति। यथा – ग्रामात् आगच्छति इत्यत्र ग्रामात् पार्थक्यभावो अपायः वर्तते। अपायो विश्लेषे विभागार्थे वा प्रयुज्यते। आगमनक्रियायां ग्रामस्य ध्रुवत्त्वात् स्थिरत्वात् तस्य अपादानसंज्ञा अभूत्। ''अपादाने पञ्चमी[18]'' इति विधिसूत्रात् पञ्चमी विभक्तिः प्रयोज्या।

---

[12] महाभाष्यम्, १-४-१

[13] अपायविवक्षया विना धनुषो व्यधेः साधकतमत्वाभावात् संज्ञाद्वयप्रसंगे परत्वात्करणसंज्ञा भवति। महाभाष्यम्, प्रदीपः, १-४-१

[14] "विभक्तिविधानक्रमेण विभक्त्यर्थविचारे प्रवृत्ते चतुर्त्यर्थे निर्णीते इदानीं प्राप्तावसरं पञ्चम्यर्थं अपादानम् विचारयितुमाह"

वा०प०,साधनसमुद्देशः,प्रकाशाम्बाकर्त्रीटीके, कारिका -१३६

[15] पा०अ०,१-४-२४

[16] महाभाष्यम्, वार्तिकम्, १-४-२३

[17] पा०अ०,१-४-२४

[18] पा०अ०, २-३-२८

**अपाये ध्रुवपदस्यार्थः –**

ध्रुवत्वविषये वैयाकरणानां मतभेदः जातः। 'ध्रु' धातुः 'गतिस्थैर्ययोः' इति अर्थद्वये प्रयुङ्क्तः। ध्रुवम् इति अवधिभूतम्। द्वयोः संयुक्तपदार्थयोः एकस्य चलनक्रियायाः विश्लेषस्य स्थितिः जायते। अत्र एतादृशचलनक्रियायां यत् अनाश्रयभूतं तद्ध्रुवत्वम्[19]। भाष्यकारदृशि[20] "ग्रामात् आगच्छति शकटेन" इत्यत्र अपाये शकटस्यापि साधनत्वेन अपादानसंज्ञा प्रसज्येत। अतः शकटस्यापादानत्वविरहे 'ध्रुवम्' इति पदं अर्हम्।

भर्तृहरिं प्रमाणरूपेण विचिन्त्य कौण्डभट्टः ध्रुवपदं लक्षयति –"प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वम्"[21] इति प्रस्तूय भर्तृहरेः कारिकां द्योतयति।

प्रश्नः समुद्यते यत् गतियुक्तेषु पदार्थेषु अपायः संभवति वा न वा?

भर्तृहरिः ध्रुवपदस्य का गतिः? इत्यत्र "संयोगिभेदात् भिन्नात्मा, गमिरेव भ्रमिर्यथा इति कारिकातः आरभ्य गतिर्विना तु अवधिना नापाय इति गम्यते"[22] इति कारिकापर्यन्तम् गतियुक्तध्रुवत्वम् प्रतिपादितम् -अत्र गतियुक्तेष्वपि अपादानं भर्तृहरेरभिमतम्। येन प्रकारेण दिग्विशेषावच्छिन्न यो गमनकर्तुः संयोगो विभागो वा यथा- गमिः अर्थात् गमनम् एव भ्रमणम् इति उच्यते तथैव ध्रुवावधिः अर्थात् ध्रुवमचलमवधिः यस्य सः ध्रुवावधिकः अध्रुवे अर्थात् चले समवेतो गतिविशिष्ट अपाय अस्मिन्शास्त्रे व्यवह्रियते[23]।

अपाये गतिस्थैर्यभावौ तट्टीकाकारौ भाष्यमनुरुध्य विश्लेषयतः - यथा गमनक्रियया उत्तरदेशसंयोगो उत्पद्यते तथैव पूर्वदेशविभागोऽपि। अत्र वैशिष्ट्यः वर्तते यत् संयोगो गम्-धातोरर्थः वर्तते। परञ्च विभागो अवाच्योऽपि संयोगानुपपत्या आक्षिप्यते। अतः गम्यर्थसंयोगेन सह साहचर्यात् सामानाधिकरण्यात् विभागेऽपि अवधिः स्वीकृतः। तेन दिग्विशेषावच्छिन्नसंयोगविभागरूपकार्यं गमनमेव यथा भ्रमणम् इति व्यपदिश्यते। अपि च गमनग्रहणात् भ्रमणरेचनस्यन्दनादयो स्वीक्रियन्ते। एवम्प्रकारेण ध्रुवमचलमनाश्रितमवधिर्यस्य स तथाभूतः अध्रुवे-चले समवेतः , गतिविशेष एव अपायाख्यो बोद्धव्यः। लोके ध्रुवपदं स्थिरार्थे अचलार्थे प्रसिद्धम्। लोकार्थमनुमोदनाय एव कात्यायनेन वार्तिकं प्रणीतम् –"गतियुक्तेष्वपादानसंज्ञा न उपपद्यते, अध्रुवत्त्वात्"[24]। धावतो अश्वात् पतितः, गच्छतः

---

[19] "द्वयोः संयुक्तयोरन्यतरस्य चलनात् विश्लेष इति स्थितिः। तत्र तादृशचलनानाश्रयभूतं ध्रुवम्"। सिद्धान्तकौमुदी, बालबोधिनी, १-४-२८

[20] महाभाष्यम्, १-४-२४

[21] वैयाकरणभूषणसारः...

[22] वा०प०, साधनसमुद्देशः,१३७-१४३

[23] संयोगिभेदाद्भिन्नात्मा गमिरेव भ्रमिर्यथा। ध्रुवावधिरपायोऽपि समवेतस्तथाऽध्रुवे॥ वा०प०, साधनसमुद्देशः,कारिका ,१३७॥

[24] महाभाष्यम्, वार्तिकम्, १-४-२५

सार्थाद् हीनः, इत्यादौ गतियुक्तेष्वपादानसंज्ञिषु ध्रुवत्त्वस्य स्थिरत्वस्य अभावात् अपादानसंज्ञा न प्रसज्येत। परञ्च शास्त्रदृशा वार्तिकम् पुनः प्रणीतम्- ''न वाऽध्रौव्यस्याविवक्षितत्त्वात्''[25]। अर्थात् चलेऽपि अध्रुवस्य अविवक्षया ध्रुवत्वं निश्चितम्।

तात्पर्यं वर्तते यत् सतोऽप्यविवक्षा स्यात्। यथा –अनुदरा कन्या। अलोमिका एडका। अत्र लोमोदर्योः भावे अपि तयोः अविवक्षा स्यात्। एवमेव असतः विवक्षा दृश्यते –यथा- समुद्रः कुण्डिका, विन्ध्यो वर्धितकम् इत्यादौ। अतस्मात् सतोऽपि अध्रौव्यस्याविवक्षितत्त्वेन अश्वसार्थयोः ध्रुवत्वविवक्षया अपादानत्वं स्यात् इति भाष्यानुमोदितं भर्तृहरेर्मतम्।

**अपादानविषये चलाचलस्थितिः अथवा संरब्धोदासीनभावः -**

शास्त्रे अनुमोदितं ध्रुवं, कूटस्थं निष्क्रियम् द्रव्यस्वभावप्राप्तं यत् ध्रौव्यं तद् ध्रुवमपायेऽपादानम् इति पाणिनिसूत्रे न ग्राह्यः, चलनस्य असंसर्गी अत्र ध्रुवपदस्यार्थः स्यात्। अतस्मात् अपाये साध्ये यद् ध्रुवम् अपायेनासंस्पृष्टम् तदपादानम् स्यात्। अतो हेतो 'धावतोऽश्वात् पतितः' इत्यत्र अश्वस्य धावनाश्रयत्वेऽपि पातक्रियायां अश्वस्य अकर्तृत्वं वर्तते। पातस्य कर्तृत्वं अश्वनिष्ठवेगे भवति। अतस्मात् अत्र अश्वस्य ध्रुवत्वमस्ति।

संरब्धोदासीनोभयकर्तृकः सर्वत्र अपायः भवति। 'धावतोऽश्वात् पतति' इत्यत्र पाते अश्व उदासीनः स्यात्। अपायाश्रयस्तु संरब्धः (चलः) अर्थात् अश्वनिष्ठवेगवत्तरः। आशुगामित्वमित्यर्थः। अध्रौव्यस्याविवक्षितत्वात् इति वार्तिकेन आशुगामित्वमत्र अविवक्षितः। अतस्मात् अश्वस्यापादानत्वं सिद्धम्।

अन्यत्रापि हरिकारिका इति नाम्ना प्रस्तुतोऽयं विषयः-

"अपाये यदुदासीनं चलं वा यदिवाऽचलम्। ध्रुवमेवातदावेशात् तदपादानमुच्यते"[26] ।

भावार्थः वर्तते, अचलं यदि वा चलं यत् कारकं अपाये अर्थात् विश्लेषहेतुक्रियायां उदासीनम् अर्थात् अनाश्रयत्वेन तिष्ठति, तद् क्रियानाश्रयत्वात् ध्रुवम् , अतः तद्दपादानमिष्यते। कौण्डभट्टः ध्रुवस्य लक्षणं परिष्करोति- "विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं ध्रुवत्वम्"[27]। तन्मते एतत् अवधिभूतं ध्रुवम् सक्रियनिष्क्रियभेदेन द्वैविध्यं प्राप्नोति। धावतोऽश्वात् पतति इत्यत्र चलम् अश्वादिकम्, ग्रामात् आयाति, वृक्षात् पत्राणि पतन्ति इत्यत्र अचलम् ग्रामवृक्षादिकम्।

---

[25] महाभाष्यम्, वार्तिकम्, १-४-२५

[26] वैयाकरणभूषणसारः, सुबर्थनिर्णयः

[27] वैयाकरणभूषणसारः, सुबर्थनिर्णयः।

प्रसंगेऽस्मिन् शंका आविर्भवति यत् 'कुड्यात् पततोऽश्वात् पतति चैत्रः' इति वाक्येऽस्मिन् विश्लेषहेतुपतनक्रियायाः आश्रयत्वे अश्वस्य अवधित्वं न सिद्धयति, अत्र अपादानस्यावकाशः भवितुं शक्ष्यति। परश्चात्र शंका निवारिता- ध्रुवत्वे विश्लेषसामान्यं न अपेक्षितम् अपितु तद्व्यक्तित्वेन विश्लेषः अभीष्टः। अतएव कुड्यात् पततोऽश्वात् पतति चैत्रः इत्यस्मिन् स्थले चैत्रनिष्ठपतनक्रियानिरूपितं अवधित्वम् अश्वे अस्ति, अपि च पतनक्रियायाः चैत्रनिष्ठत्वात् अश्वे तदनाश्रयत्वमपि वर्तते। एवमेव अश्वनिष्ठपतनक्रियायाः अवधित्वं कुड्ये स्यात्। अतो हेतो अत्र अश्वकुड्योः ध्रुवत्वम् निर्विवादम् इति कारिकायां[28] स्पष्टम्।

## समीक्षा –

भर्तृहरेः टीकाकारौ संरब्धोदासीनेति साधनद्वयसाध्यं अपादानमुच्यते। (इत्यादिपदेन महाभाष्यस्य उद्योतटीका[29] वर्तते, तत्रापि इयमेव कारिका एतस्मिन्प्रसंगे उद्धृता)। अत्र संरब्धः अर्थात् चलः अश्वादिः अपि च उदासीनः – अचलः ग्रामादिः इत्यर्थः। परञ्च भूषणसारेत्यादौ[30] अपाये उदासीनभावस्यैव स्थितिद्वयं चलं वा अचलं वा इति स्वीकृतः। वाक्यपदीयस्य व्याख्यानद्वये उदासीने न द्वयोः चलाचलयोः अन्तर्भावः क्रियते। तत्र तु संरब्धोदासीनोभयकर्तृकः अपायः अङ्गीकृतः इति विशेषः।

धावतोऽश्वात् पतितः इत्यत्र तु क्रियायाः अनावेशात् अश्वस्य ध्रुवत्वम् उक्तम्। परञ्च "परस्परात् युध्यतो मेषौ अपसरतः" इत्यत्र मेषद्वयक्रियाजन्ये अपाये उभौ अपि मेषौ कर्तृत्वेन अध्रुवौ स्तः। अतस्मात् अत्र अपादानत्वं न विवक्षितम्। किञ्च अत्रापि अपादानत्वं स्यात्। एकस्मिन्नेव अपाये तद्विभागजनकक्रिया व्यक्तिभेदात् भिन्ना प्रतीयते। अतएव एतन्मेषनिष्ठक्रियायाः अपरमेषे अभावात् अनाश्रयत्वात् वा उभयोः मेषयोः अपादानत्वं ग्राह्यम्। प्रोक्तं च वाक्यपदीये –

"मेषान्तरक्रियापेक्षमवधित्वं पृथक्-पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्"[31]।

अर्थात् इतरमेषक्रियायां इतरमेषस्यानावेशात् इतरमेषापसरणक्रियायां इतरस्य ध्रौव्यम्। स्वक्रियायां तु द्वयोः मेषयोः कर्तृत्वं पृथक् पृथक् आचक्षते। द्वयोः मेषयोः परस्परं एकस्यापेक्षया अपरस्य अवधित्वं पुनः अपरस्य अपेक्षया तस्यापि ध्रुवत्वम् निश्चितम्। परञ्च यदा मेषयोः परस्परं अवधिभावो न

---

28 "पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ । तस्याप्यश्वस्य पतने कुड्यादिध्रुवमिष्यते"॥ वैयाकरणभूषणसारः, सुबर्थनिर्णयः

29 "न वाऽध्रौव्यस्याविवक्षितत्त्वात्" अपाये यदुदासीनम्.. । महाभाष्यम्, वार्तिकम्, उद्योतः, १-४-२४

30 सिद्धान्तकौमुदी, बालबोधिनी, १-४-२८

31 वा०प०, साधनसमुद्देशः, कारिका - १४१

विवक्ष्यते, तदा अन्यो पर्वतादिः अवधित्वं न तु मेषयोः[32]। तत्र तु पर्वतात् मेषौ अपसरतः इति अपादानसंज्ञा।

एवम्प्रकारेण अपायो द्विविधः विवक्षितः। अन्यतरकर्मजः उभयकर्मजश्च। स्थाणो श्येनो अपसर्पति इत्यत्र अन्यतरकर्मजे विभागे अपायजनकक्रियायाः आश्रयविरहात् उदासीनत्वात् वा स्थाणोः ध्रुवत्वम् अक्षुण्णम्। परस्परान्मेषौ अपसरतः इत्यत्र उभयक्रियाजन्यापाये यद्यपि उभौ अपि मेषौ अपायाश्रयत्वात् अध्रुवौ स्तः। तथापि अपसर्पतो मेषात् मेषो अपसरति इत्यत्र कर्तृभेदात् भिन्न एव अपायरूपे क्रिये इतरापायेन इतरस्यानावेशात् द्वयोः मेषयोः ध्रुवत्वम् अपि च अवधित्वम् ग्राह्यम्। एवं अपादानत्वं सिद्धम्।

अपादानस्य प्रसंगे अवधिं विहाय गतिमात्रेण अपायो न भवति। उच्यतेऽपि - "विभागजसंयोगानुकूलोऽवधिसाकांक्षो गतिविशेषः अपायः"[33]। अतएव अवधिना विना गतिः अपायः न स्वीक्रियते। प्रदीपे कैयटः ख्यापयति- "सति ह्यवधौ गतिरपायो भवति, नान्यथा गतिविशेषत्त्वात् अपायस्य इति"। गतौ अवधेः अपरिहार्यत्त्वात् 'वृक्षात् पर्णं पतति' इत्यत्र पत्रस्य पतनक्रियायां यदि वृक्षः अवधित्वेन विवक्षितः तर्हि 'वृक्षात् पर्णं पतति' इति षष्ठी प्रयुक्तः।

भर्तृहरिः आह –"गतिर्विना तु अवधिना न अपाय इति कथ्यते। वृक्षस्य पर्णं पतति इत्येवं भाष्ये निदर्शितम्"[34] तात्पर्यं वर्तते, वृक्षसम्बन्धिनः पर्णस्य पातोऽत्र वाक्यार्थो विवक्षितः, न त्वत्र वृक्षस्य अवधित्वविवक्षा वर्तते। अतः अत्र अपायो न भवति। वार्तिकेऽप्युक्तम् "न वाऽपायस्याविवक्षितत्त्वात्"[35]। यदि अपायो अत्र विवक्ष्यते तदा वृक्षस्यावधित्त्वात् 'वृक्षात् पर्णं पतति' इति भवति। तत्र न बोध्यते कस्य सम्बन्धिपर्णं कङ्कस्य वा कुररस्य वा इत्यर्थः।

अध्रुवत्त्वात् गतियुक्तेष्वपादानसंज्ञा न उत्पद्यते। अचलं ध्रुवं एकरूपं चेति परिस्पन्दे ध्रुवता न भवितुं शक्यते। यथा –अश्वत्रस्तादिति। अत्र त्रासपूर्वके परिस्पन्देऽनेकार्थत्वात् धातूनां त्रसिर्वर्तते। त्रस्तश्चाश्वः पातस्य निमित्तम् भवति। अतस्मात् पूर्वमश्वस्य त्रस्तत्वेन सह सम्बन्धः, अनन्तरं पतित इति अनेन। अतः ध्रुवताऽत्र अश्वस्य नास्ति[36]।

---

[32] "अभेदेन क्रियैका तु द्विसाध्या चेत् विवक्षिता। मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः।" वा०प०, साधनसमुद्देशः, १४२

[33] परमलघुमञ्जूषा, कारकविचारः।

[34] वाक्यपदीयम्, साधनसमुद्देशः, १४३

[35] महाभाष्यम्, वार्तिकम्, १-४-२३

[36] महाभाष्यम्, प्रदीपः, ध्रुवमपायेऽपादानम्, १-४-२४

**भर्तृहरेर्मते अपादानस्य भेदत्रयम्, तल्लक्षणं च -**

भर्तृहरिः विभक्तिविधानक्रमेण सम्प्रदानम् विविच्य क्रमप्राप्तं अपादानम् व्यनक्ति। अत्र त्रिविधं अपादानम् व्याख्यातम्-निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियञ्चेति[37]।

अपाये साध्ये यद् ध्रुवम् एकरूपम् तद् साधनं अपादानम् स्यात्। अवधिविशेषापेक्षत्वात् चलाचलोभयकर्तृकोऽपायः अपादानस्य विषयः सः निर्दिष्टः स्वशब्देनोपात्तः लभ्यः वा तद् प्रथमं अपादानम्। यथा- चैत्रः ग्रामात् आगच्छति, पर्वतात् अवरोहति। इत्यत्र अपायस्य विभागरूपस्य द्विष्ठत्वात् ग्रामचैत्रौ पर्वतचैत्रौ च उभौ अपाये कर्तारौ स्तः। तत्र ग्रामोऽचलः चैत्रस्तु चलः एवमेव पर्वतोऽपि अचलः। अत्रागमनं अवरोहणं च स्वरूपेण जन्यजनकयोरभेदमादाय वाऽपायः। स चात्र साक्षात् धातुना निर्दिष्टत्वात् निर्दिष्टविषयं अपादानम् वर्तते।

द्वितीयं अपादानम् वर्तते उपात्तविषयं। यत्र गुणभावेन प्रधानभावेन अथवा धात्वर्थेन स्वान्तर्गृहीतोऽपायलक्षणो विषयो येन तदुपात्तविषयम्। यथा – बलाहकात् विद्योतते विद्युत् इत्यत्र बलाहकात् निःसृत्य ज्योतिः विद्योतते अथवा बलाहकात् विद्योतनं निःसरति इत्यर्थः। अत्र निःसरणाङ्गे विद्योतने , विद्योतनाङ्गे निःसरणे वा विद्युतिः वर्तते। अत्र निःसरणरुपोऽपायो धात्वर्थविद्योतनेन गुणतया प्राधान्येन वा उपात्तः इति उपात्तविषयं अपादानम्। अन्यत्रापि यथा कुसूलात् पचति, ब्राह्मणाच्छंसी इति। प्रथमं तावत् आदानाङ्गे पाके पचिः वर्तते। कुसूलात् आदाय पचति इत्यर्थः। अपरे ग्रहणाङ्गे शंसने शंशिर्वर्तते। ब्राह्मणग्रन्थात् गृहीत्वा शंसति इत्यर्थः।

अपेक्षितक्रियं अपादानम् तत्र वर्तते यत्र अपायरूपा क्रिया अपेक्षिता वर्तते। यथा – 'मथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' अत्र प्रकर्षार्थकतरप्प्रत्ययसामर्थ्यात् विभागहेतुः अनुमीयमानापकर्षक्रिया अपायलक्षणे अपेक्षिता क्रिया असौ अत्र, अपेक्षितक्रियं अपादानम्।

निष्कर्षतः निर्दिष्टविषयं उपात्तविषयं अपेक्षितक्रियञ्चेति त्रिविधं अपादानम् शब्दशास्त्रे सम्मतम्। एवमेव त्रिविधमेवापादानं ध्रुवमपायेऽपादानम् इत्येकेनैव सूत्रेण भासितम्। तथापि "भीत्रार्थानां भयहेतुः"[38] इत्यादिसूत्रात् लक्षितं अपादानं बालानां सुखबोधाय विरच्यते इति भर्तृहरिमते[39]। इत्यलम्।

---

37 "निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधापादानमुच्यते" वा०प०, साधनसमुद्देशः, कारिका-१३६॥

38 पा०अ०,१-४-२५

39 "निर्धारणे विभक्ते यो भीत्रादीनां च यो विधिः। उपात्तापेक्षितापायः सोऽबुधप्रतिपत्तये"।वा०प०,तृ०का०,साधनसमुद्देशः, कारिका -१४७

## सन्दर्भग्रन्थसूची

**प्राथमिकस्रोतांसि –**

- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, प्रथमो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, द्वितीयो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, पदकाण्डम्, तृतीयो भागः, (व्याख्याद्वयोपेतम्) सम्पूर्णानन्द संस्कृतविश्वविद्यालयः, वाराणसी, २०१६
- भर्तृहरिः, वाक्यपदीयम्, तृतीयकाण्ड, प्रथमो भागः, अय्यर, सुब्रमनिय (सम्पादक),डेक्कन कालेज पोष्ट ग्रेजुएट एण्ड रिसर्च इंस्टीट्यूट, पुणे, १९९४
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), प्रथमो भागः, ब्रह्मकाण्डम्, चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), द्वितीयो भागः, वाक्यकाण्डम्, चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), तृतीयो भागः, पदकाण्डम् (पदकाण्डे प्रथमो भागः), चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- भर्तृहरिः, वाक्यपदीयम्, हरिनारायण तिवारी (व्याख्याकार एवं सम्पादक), तृतीयो भागः, पदकाण्डम् (पदकाण्डे द्वितीयो भागः), चौखम्बा संस्कृत सीरीज आफिस वाराणसी, २०१५
- तर्कालंकारः, जगदीशः, शब्दशक्तिप्रकाशिका, चौखम्बा संस्कृत प्रकाशन, वाराणसी, वि०सं०२०७०
- पतञ्जलिः, व्याकरणमहाभाष्यम् (भाग- १,२,३,४,५), भार्गवशास्त्री जोशी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१४
- पतञ्जलिः, महाभाष्यम्, युधिष्ठिरो मीमांसकः, श्री प्यारेलाल द्राक्षादेवी न्यास (ट्रस्ट्र) सी० ४, सी०सी०कालोनी, दिल्ली, वि.सं.२०३१
- भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी (कारकान्तः प्रथमो भागः), गोपालदत्तपाण्डेयः (व्या०), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७

- वामनजयादित्यौ, काशिका 'प्रकाश-हिन्दीव्याख्योपेता' (प्रथमो भागः, द्वितीयो भागः) नारायणमिश्रः(व्या०), चौखम्बा प्रकाशन, वाराणसी, वि०सं० २०६२
- भट्टोजिदीक्षितः,वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः, द्वितीयो भागः, तृतीयो भागः, चतुर्थो भागः), ईश्वरचन्द्रः, चौखम्बा संस्कृत प्रतिष्ठान,दिल्ली, २०१०
- भट्टः, नागेशः, परमलघुमञ्जूषा, जयशंकरलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, वि०सं०, २०४१
- भट्टः, नागेशः, परमलघुमञ्जूषा, लोकमणिदाहालः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३
- भट्टः, कौण्डः, वैयाकरणभूषणसारः, चन्द्रिका प्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१६
- भट्टः, कौण्डः, वैयाकरणभूषणसारः, ब्रह्मदत्तद्विवेदी, चौखम्बा पब्लिशर्स, वाराणसी, २०११
- मिश्रः, आद्याप्रसादः, लघुसिद्धान्तकौमुदी, भीमसेन शास्त्री, भैमी प्रकाशन, दिल्ली, २०१५
- कालिदासः, मेघदूतम् (द्वादशटीकोपेतम्) in the eyes of the commentators, प्रफुल्लकुमार मिश्रः निवेदिता पतिः, प्रतिभा प्रकाशन दिल्ली, २०१६
- कालिदासः, मेघदूतम्, दयाशंकर शास्त्री, चौखम्बा सुरभारती प्रकाशन वाराणसी, २०१४
- पाणिनिः, अष्टाध्यायी (भाग १-२), ईश्वरचन्द्र (व्याख्याकार), चौखम्बा संस्कृत प्रतिष्ठान दिल्ली, २००४
- पतञ्जलिः, व्याकरणमहाभाष्यम् (नवाह्निकातिरिक्त प्रथमोऽध्यायः), 'ज्योत्सना' हरिनारायण तिवारी, चौखम्बा विद्याभावन वाराणसी, २००९
- पतञ्जलिः, व्याकरणमहाभाष्यम् (प्रथमभागः), गुरुप्रसादशास्त्री, प्रतिभा प्रकाशन दिल्ली, १९९९
- पतञ्जलिः, व्याकरणमहाभाष्यम् (विद्यानिधिहिन्दी व्याख्या), भीमसिंह वेदालंकार, विद्यानिधि शोधसंस्थान, कुरुक्षेत्र, २०१५


**द्वितीयकस्रोतांसि –**


- अय्यर, सुब्रह्मण्यम्, वाक्यपदीय ब्रह्मकाण्ड (स्वोपज्ञवृत्ति-पद्धति) डेकन कालेज, पूना, १९६६
- अय्यर, सुब्रह्मण्यम्, भर्तृहरि (हि०अनु०), रामचन्द्र द्विवेदी, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, १९८१

- शास्त्री, श्रीवत्स, हेलाराज का व्याकरण दर्शन को योगदान,विद्यानिधि प्रकाशन, दिल्ली, २०००
- शास्त्री, श्रीवत्स, भर्तृहरि और सोपज्ञवृत्ति, विद्यानिधि प्रकाशन, दिल्ली, २०१२
- शास्त्री, श्रीवत्स, वाक्यपदीय- सम्बन्धसमुद्देश (कारिकासहित हेलाराजीय प्रकीर्णप्रकाश का अनुवाद), विद्यानिधि प्रकाशनम्, दिल्ली, २०१४
- भाटिया, कान्तारानी, भर्तृहरि का वाक्यपदीय (पुण्यराज की दृष्टि में),भारतीय विद्या प्रकाशन, दिल्ली, १९९२
- झा, कामदेव, भर्तृहरिदर्शनम् (अष्टादश शोधपत्राणां समवायः), निर्मल बुक एजेन्सी, कुरुक्षेत्र, २०१२
- वर्णी, रामप्रकाशः, व्याकरणदर्शन को कैयट का योगदान, परिमल पब्लिकेशन दिल्ली, २००५
- उपाध्याय, बलदेव, संस्कृत वाङ्गमय का बृहद् इतिहास, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ, २००१
- मिश्रः, हरिरामः, व्याकरणतन्त्र का काव्यशास्त्र पर प्रभाव, ईस्टर्न बुक लिंकर्स, दिल्ली, १९९४
- वर्मा, सत्यकाम, संस्कृतव्याकरण का उद्भव और विकास, मोतीलाल बनारसीदास, वाराणसी, १९७९

English Books.

- Iyer, Subrhmanian, Bhartrhari (A Study of the  Vakyapadiya in the light of the ancient commentaries) Poona ,1969
- Iyer, Subramanian, English translation of the Vakyapadiya of Bhartrhari with vartti, Poona, 1969
- Raja, K. Kunjunni And Coward, Harold G, ENCYCLOPEDIA OF INDIAN PHILOSOPHIES, Vol- V, The Philosophy of the Grammarians, Motilal Banarasidas Publishers Private Limited, Delhi, 2008
- Biswal, Banamali, Bhartṛhari as a Grammarian & Philosopher, Padmaja Prakashan, Allahabad, 2006
- Chaturvedi, Mithilesh, Bhartṛhati, Language, Thoudht and Reality, (Proceedings of the International Seminar Delhi, December 12-14, 2003), MOTILAL BANARSIDASS PUBLISHERS PRIVATE LIMITED, DELHI, 2009

**कोशग्रन्थाः –**


- आप्टे, वामन शिवराम, संस्कृत हिन्दी शब्दकोश,  राधा पब्लिकेशन नई दिल्ली, २०१४
- सिंहः, अमरः, नामलिङ्गानुशासनम् नाम अमरकोषः (सुधा (रामाश्रमी) व्याख्यया सहितः), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०११
- पाण्डे, उमा प्रसादः, संस्कृत हिन्दी अंग्रेजी शब्दकोश, कमल प्रकाशन, नई दिल्ली
- अवस्थी, बच्चूलाल, भारतीय-दर्शन-बृहत्कोश (भाग १-४), शारदा पब्लिशिंग हाउस, दिल्ली, २००४
- वर्णेकर, श्रीधरभास्कर, संस्कृतवाङ्मयकोश, (भारतीय भाषा परिषद कललत्ता) लोकभारती प्रकाशन, इलाहाबाद, २००१
- तर्कवाचस्पति, तारानाथ, वाचस्पत्यम् (भाग-छः), राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, २००२